Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 2 | ISSN : 2582-0095

# अद्वैतसिद्धिदिशा मिथ्यात्वविचार:

डॉ. कुञ्जविहारी द्विवेदी
सहायक-आचार्य:,न्यायवैशेषिक, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी।

**Article Info**
**Article History**
Accepted : 25 March 2024
Published : 05 April 2024

**Publication Issue :**
Volume 7, Issue 2
March-April-2024

**Page Number :** 87-93

**शोधसारांश**:- ब्रह्मसत्यं जगन्मिथ्या'इति सिद्धान्तमनुसृत्य 'एकं ब्रह्म द्वितीयो नास्ति' 'नेह नानास्ति। किञ्चन' 'एकमेवाद्वितीयं ब्रह्म' इत्यादिश्रुत्या जगत: मिथ्यात्वमेव सिद्धं भवति परन्तु व्यावहारिकसत्ताकाले तस्य मिथ्यात्वं नानुभवपथमधिरोहति तदर्थं मधुसूदन सरस्वतीमहोदयेन तर्कबलात् अस्य मिथ्यात्वं साधितं यद्यपि मिथ्यात्वलक्षणं पूर्वाचार्याणमेव तथापि तर्कनिकषेण साधने प्रतिज्ञातं वस्तु सिद्धं भवति सिद्धान्ततया प्रपञ्चो-मिथ्या- दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत् इत्यनुमानाकारमादाय तत्साधने ग्रन्थकार: प्रवृत्त:।

**मुख्यशब्दा**:- प्रपञ्च:, विशेष्य:, दोष:, प्रतिपन्न: ।

विप्रतिपत्तिवाक्यम् ब्रह्मप्रमातिरिक्ताऽबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि न वा।[1] अत्र चिद्भिन्नं पक्ष: तत्र विशेषणद्वयमस्ति ब्रह्मप्रमातिरिक्ताऽबाध्यत्वं एवं सत्त्वेन प्रतीत्यर्हत्वम्। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी एकाकोटि: वेदान्तिनाम्, तदभावकोटिश्च द्वैतिनाम् चिद्भिन्नं नाम प्रपञ्च: वियद् जलं पृथिवी इत्यादय: स एव विशेष्य: ब्रह्मभिन्न: प्रपञ्च: इत्यर्थ: प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी = मिथ्या चिद्भिन्नं मिथ्या न वा इत्येवोच्यमाने शशविषाणादिरूप अलीके बाध: स्यात् अलीकस्य ब्रह्मभिन्नत्वात् अतोऽलीके बाधवारणाय सत्वेन प्रतीत्यर्हमित्युक्तम्।

सत्त्वेन प्रतीत्यर्हं = सत्त्वप्रकारकप्रतीतिविशेष्यम्[2]इत्यर्थ: यथा सत्त्वप्रकारकप्रतीति: ''जलं सत्'' इति तत्र विशेष्य: जलम्। असतोऽलीकस्य सत्त्वप्रकारकप्रतीतिविशेष्यत्वं नास्ति शशविषाणं सदिति कुत्राप्यप्रतीते:। वेदान्तिनां मते असत् इत्युक्ते शशविषाणं, गगनकुसुमं इत्यादेरेव ग्रहणम् असत् = तुच्छं= अलीकं= अवर्तमानं= अप्रसिद्धं असद्विलक्षणत्वे सतिव्रह्मभिन्नम् इत्येव धर्मिकथने शुक्तिरजतादौ सिद्धसाधनता स्यात् शुक्तिरजतस्य सदसद्विलक्षणत्वात्। अत: तद्व्यावर्तनाय ब्रह्मप्रमातिरिक्ताऽबाध्यत्वविशेषणं प्रदत्तम्। ब्रह्मप्रमा च निष्प्रकारकब्रह्मज्ञानं तदतिरिक्ता या प्रमा तयाऽबाध्यत्वमिति। तथा च शुक्तिरजतादीनाञ्च ब्रह्मप्रमातिरिक्त शुक्तिप्रमया बाध्यत्वात् ब्रह्मप्रमातिरिक्तप्रमाऽबाध्यत्वं

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License.

नास्ति। ब्रह्मप्रमाऽबाध्यत्वे सति इत्युक्त्यैव सामञ्जस्ये ब्रह्मप्रमातिरिक्तप्रमाऽबाध्यत्वमिति अभावद्वयगर्भं किमर्धमुक्तम् तस्येदमुत्तरम् वादिप्रतिवादिसाधारणधर्मिनिर्देशाय द्वैतसत्यत्ववादिमते प्रपञ्चस्य सत्यत्वेन ब्रह्मप्रमाबाध्यत्वाभावात् धर्मिण: असिद्धि:। अभावद्वयप्रवेशे च नायं दोष:प्रपञ्चसत्यत्ववादिमते प्रपञ्चस्य सर्वथाऽबाध्यत्वात् ब्रह्मप्रमातिरिक्ताऽबाध्यत्वमपि अस्त्येव। सिद्धान्तिमते प्रपञ्चस्य ब्रह्मज्ञानबाध्यत्वेन तदतिरिक्तप्रमयाऽबाध्यत्वमक्षतमेव।

ब्रह्मप्रमातिरिक्ताऽबाध्यत्वमत्र प्रमापदं किमर्थं? ब्रह्मज्ञानान्यज्ञानाऽबाध्यत्वे सतीत्येवोच्यमाने को दोष:? अधिष्ठानसाक्षात्कारेण हि आरोपितवस्तुबाध्यते यथा रजताधिष्ठान शुक्तिसाक्षात्कारेण रजतज्ञानस्य बाध:। सर्वप्रत्ययवेद्येऽस्मिन् ब्रह्मरूपे व्यवस्थिते[3] इति वार्तिकोक्त्या सर्वेषांज्ञानानां ब्रह्मविषयकत्वात् शुक्त्यवच्छिन्नचैतन्यविषयकशुक्तिज्ञानस्यापि ब्रह्मज्ञानत्वात् शुक्तिज्ञानस्य ब्रह्मज्ञानान्यज्ञानत्वाभावाच्छुक्तिज्ञानबाध्ये प्रातिभासिकरजते ब्रह्मज्ञानान्यज्ञानाऽबाध्यत्वात् तस्य च मिथ्यात्वेन सिद्धत्वात् मिथ्यात्वानुमाने सिद्धान्तिमते सिद्धसाधनता स्यात् अत: प्रातिभासिकस्य शुक्तिरजतादे: विप्रतिपत्तिधर्मिकोटौ अप्रवेशायज्ञानपदं विहाय प्रमापदमुक्तम्।

तथा च विप्रतिपत्तिधर्मी न शुक्तिरजतादिकमपितु वियद् पृधिवी, जलमित्यादि: प्रपञ्च: (व्यावहारिकप्रपञ्च:) निष्कर्ष: ब्रह्मप्रमेत्यादिविशेषणेन प्रातिभासिकशुक्तिरजतादीनां व्यावृत्ति: सत्त्वेन प्रतीत्यर्हत्वविशेषणेन अलीकस्य शशविषाणादे: व्यावृत्ति: चिद्भिन्नमित्यनेन ब्रह्मणो व्यावृत्ति:। तथा च व्यावहारिकप्रपञ्च: मिथ्या न वा इति विप्रतिपत्ति: फलति।

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि अत्र प्रतिपन्न: = प्रतिपत्ति: तद्विषय: प्रतिपन्न: = ज्ञात: स्वसम्बन्धितया ज्ञात: = स्वप्रकारकधीविशेष्य:।

उपाधि: उपसमीपे आधीयते अस्मिन् इति उपाधि: = अधिकरणम्। त्रैकालिकोयो निषेध: = अत्यन्ताभाव:, तस्य प्रतियोगी ज्ञानविषयेऽधिकरणे तन्त्वादौ यस्त्रैकालिको निषेध: घटात्यन्ताभाव: तत्प्रतियोगित्वं घटेऽस्तीति सिद्धसाधनम् इति न वक्तव्यम् तन्त्वादीनां घटप्रकारकधीविशेष्यत्वाभावात्। प्रतिपन्नो पाधितया तन्त्वादीनां ग्रहणासंभवात्।

**प्रतिपन्न:-** भ्रमप्रमासाधारणी प्रतीति: उपाधि: = अधिकरणम् प्रतिपन्नोपाधौ ब्रह्मणि प्रपञ्चस्यत्रैकालिकनिषेध: ताप्रतियोगित्वं प्रपञ्चेऽस्ति इति प्रपञ्चस्य मिथ्यात्वमायातम्।

**प्रपञ्चरूपे पक्षे तादात्म्यसम्बन्धेन मिथ्यात्वं साध्यम्-** प्रतिपन्नोपाधौ यत् साध्यघटकं तत्र अधिकरणार्थकं उपाधिपदं न लक्षणघटकम् व्यावृत्त्यजनकत्वात् किन्तु प्रतिपन्नपदघटकक्तप्रत्ययार्थविषयताया: विशेष्यत्वरूपत्वलाभाय उपाधिपदमुक्तम्।

ननु त्रैकालिकनिषेधकप्रतियोगित्वमेवमिथ्यात्वमुच्यताम् किं प्रतिपन्नविशेषणप्रक्षेपेण इति चेत् न शशविषाणाद्यसद्व्यावर्तनाय प्रतिपन्नविशेषणं प्रदत्तम्। सर्वत्र त्रैकालिक- निषेधप्रतियोगित्वं शशविषाणादावलीकेऽप्यस्ति। प्रतिपन्नपदस्य स्वप्रकारकप्रतीतिविशेष्यमर्थ: अलीकस्य शशविषाणादे: प्रतीतिविषयत्वाभावेनालीकप्रकारक प्रतीतिविशेष्यमेवाप्रसिद्धम्।

**प्रथममिथ्यात्वलक्षणम्** पञ्चपादिकाकारपद्मपादाचार्यस्य सदसत्त्वानधिकरणत्वरूपमनि-र्वाच्यम् तस्य कोऽर्थः सत्त्वविशिष्टासत्त्वाभावः उत सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं धर्मद्वयम् आहोस्वित् सत्त्वात्यन्ताभाववत्त्वे सति असत्त्वात्यन्ताभावरूपम्।[4]

तत्र नाद्यः सत्त्वमात्राधारे जगति सत्त्वविशिष्टासत्त्वानभ्युपगमात् तथा च सत्त्वस्य वर्तमानत्वेऽपि सत्त्वविशिष्टासत्त्वाभावः अस्त्येव एकसत्त्वेऽपि द्वयं नास्तीतिरीत्या। तथा च सिद्धसाधनं न द्वितीयः पक्षः (सत्त्वाभावः असत्त्वाभावश्च इति पक्षः) परस्परविरहरूपयो- धर्मयोरेकतरनिषेधस्यान्यतरविधिनान्तरीयकत्वात्। सत्त्वात्यन्ताभावे साध्ये असत्त्वस्यैव प्राप्त्या पुनः असत्त्वात्यन्ताभावेसाध्येव्याघातः। किञ्च साक्षी चेता केवलो निर्गुणश्च इति श्रुत्या ब्रह्मणि बाध्यत्वाभावरूपंसत्त्वंनास्ति एवं बाध्यत्वरूपमसत्त्वं यत् त्रैकालिकपारमार्थिकनिषेधप्रतियोगित्वं तदपिनास्ति ब्रह्मणोऽपि बाध्यत्वेऽविद्यादीनां रूपसाक्षित्वं न स्यात् तथा च निर्धर्मके ब्रह्मणि सत्त्ववासत्त्वयोरभावेऽपि यथा तस्य सद्रूपत्त्वं तथा प्रपञ्चस्यापि सत्त्वासत्त्वराहित्येन सद्रूपत्त्वं किंन स्यात् एवञ्च मिथ्यात्वसाधने प्रयासः सद्रूपत्त्वं च साधितमिति अर्थान्तरम्।शुक्तिरूप्ये च सत्त्वभावेऽपि असत्त्वाभावासंभवात् साध्यवैकल्यम् (व्यभिचारः)।

अत एव न तृतीय पक्षः व्याघातात्, अर्थान्तरात्, साध्यवैकल्याच्च। सिद्धान्तः-द्वितीय पक्षः समीचीनः सत्त्वासत्त्वयोः परस्परविरहरूपत्वं न स्वीक्रियते। अत्र त्रिकालाबाध्यत्वं सत्त्वम् एवं क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानानधिकरणत्वम् (प्रतीयमानानर्हत्वम्) च असत्त्वम् एतादृशासत्त्वञ्च शशविषाणादावेवास्ति न तु प्रपञ्चे व्यावहारिके प्रतिभासिके वा। तथा च एतादृशसत्त्वमपिशुक्तिरूप्ये नास्ति एवं तादृशासत्त्वमपि शुक्तिरूप्ये नास्ति इति शुक्तिरूप्ये साध्य-समन्वयः। तथा च त्रिकालाबाध्यविलक्षणत्वेसति क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वं रूपंसाध्यं (मिथ्यात्वं) पर्यवसितम्। इति संक्षेपः-

**द्वितीयमिथ्यात्वलक्षणम्** पञ्चपादिकाविवरणकार प्रकाशात्मयतेः प्रतिपन्नोपाधौ- त्रैकालिकनिषेध प्रतियोगित्वम् मिथ्यात्वम्[5] प्रतिपन्नत्ववञ्चात्र न प्रमितत्त्वम् तथासति प्रतियोग्याधारत्वेन प्रमितेऽधिकरणे प्रतियोगिनस्त्रैकालिकनिषेध विरोधः स्यात्। नापि भ्रान्तिप्रतिपन्नत्वम् तथा सति प्रतियोग्याधारत्वेन भ्रान्त्या प्रतीतेऽधिकरणे प्रतियोगिनस्त्रैकालिकनिषेधस्येष्टत्वेन सिद्धसाधनं स्यात् तथा च प्रतिपन्नत्वमत्र प्रतिपत्तिः न प्रमारूपा न भ्रान्तिरूपा अपितु भ्रमप्रमासाधारणी प्रतीतिः। शुक्तौ रजताभावप्रतियोगित्वस्य रजतत्वस्य प्रतीयमानत्वात् रजतं मिथ्या।

त्रैकालिकपदेन ध्वंसप्रागभावयोः व्यावृत्तिः[6] तयोः सर्वदा विद्यमानत्वाभावात् ब्रह्मरूपज्ञाताश्रये प्रपञ्चस्य यो त्रैकालिकोनिषेधः सः पारमार्थिकः प्रतिभासिकः व्यावहारिकोवा? नाद्यः प्रपञ्चतादात्म्यापन्ने ब्रह्मणि प्रपञ्चनिषेधस्य पारमार्थिकत्वेऽद्वैतहानिः। ब्रह्मणः प्रपञ्चनिषेधस्य च पारमार्थिकत्वेन वस्तुद्वयाङ्गीकारात् ब्रह्माद्वैतसिद्धान्तहानिः। न द्वितीयः। निषेधस्यप्रातिभासिकत्वे तत्प्रतियोगिनः सत्यत्त्वापत्तिः तथा च पूर्वपक्षिमतसिद्धत्वात् जगत्सत्यत्वसाधनात् सिद्धसाधनम्।

न तृतीयः। निषेधस्य व्यावहारिकत्वे ब्रह्मज्ञानेन व्यावहारिकप्रपञ्चावस्य जगदभावस्य बाध्यत्वेन जगतः पारमार्थिकत्वमेव प्राप्तं भवति तथा च अर्थान्तरम्।

सिद्धान्तः-प्रतिपन्नोपाधौ त्रैकालिकनिषेधः पारमार्थिक एव न चाद्वैतसिद्धान्तहानिः, अभावस्याधिकरणस्वरूपत्वात् तथा च ब्रह्मणि प्रपञ्चस्य यः त्रैकालिको निषेधः तस्य तात्त्विकत्वेऽपि (पारमार्थिकत्त्वेऽपि) सः निषेधः निषेधाधिकरणीभूतब्रह्मणोऽत्यन्ताभिन्नः।

तात्त्विकाभावप्रतियोगिनः प्रपञ्चस्याऽपि तात्त्विकत्वापत्तिः अतः पुनः अद्वैतसिद्धान्तहानिः इति न शङ्कनीयम् यतोहि प्रतियोग्यभावयोः समानसत्ताकत्वं न स्वीक्रियते अर्थात् यादृशी सत्ता अभावस्य तादृशीसत्ता प्रतियोगिनः इति न स्वीक्रियते शुक्तिरूप्ये व्यभिचारात् तत्र रजताभावः व्यावहारिकः, रजतञ्च प्रातिभासिकम्।

अथवा व्यावहारिक एव प्रपञ्चनिषेधः अङ्गीकर्तव्यः। न च निषेधस्यापारमार्थिकत्वेऽपि प्रतियोगिनः पारमार्थिकत्वं स्यात् तथा च जगत्सत्यत्वसिद्धया अर्थान्तरं स्यात् इति वाच्यम् स्वप्नार्थस्य स्वाप्ननिषेधेन द्वयोः अपारमार्थित्वदर्शनात् प्रपञ्चाभावस्य व्यावहारिकत्वे अर्थात् त्रैकालिकनिषेधस्य व्यावहारिकत्वे ब्रह्मज्ञानेन त्रैकालिकनिपेधस्यापि बाध्यत्वात् निषेधस्य निषेधे प्रतियोगिनः प्रपञ्चस्य सत्त्वापत्तिः इति शङ्का निषेधस्य निषेधे प्रतियोगिसत्त्वं तत्रायाति[7] यत्र घटदेशे घटाभावमः तस्य भ्रमस्य बाधे घटसत्त्वं व्यवस्थाप्यते परन्तुसकर्वत्र नायं नियम घटध्वंसाधिकरणेकपाले घटप्रागभावो नास्ति अतः घटप्रागभावाभावः तत्रास्ति परन्तु घटोऽपि नास्ति इत्थं घटप्रागभावस्यापिनिषेधोऽस्ति एवं प्रतियोगिघटस्यापि निषेधोऽस्ति अर्थात् प्रतियोग्यभावयोः द्वयोरपि निषेधः तत्र दृश्यते।

उपाधिपदस्य सदर्थकत्वात्। सदधिकरणकात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति साध्यम् फलितम्। अत्राधिकरणपदेन सम्बन्धित्वं विवक्षितम् तेन अवृत्तिपदार्थगगनस्याधिकरणा प्रसिद्धेऽपि गगनसम्बन्धित्वं भूतलादौ अस्त्येवसंयोगसम्बन्धेन समवायसम्बन्धेन वायत् घटाधिकरणं समवायसम्बन्धेन संयोगसम्बन्धेन वा घटस्य तन्निष्ठात्यन्ताभावप्रतियोगितया तस्य मिथ्यात्वंसर्वमतसिद्धतया सिद्धसाधनम्। तस्यवारणन्तु येन सम्बन्धेन यद् यस्याधिकरणं तेनैव सम्बन्धेन तन्निष्ठाभावप्रतियोगित्वमिति विवक्षणीयम्। एवमुक्तावपि अव्याप्यवृत्तिसंयोगादिषु प्रतियोगिसमानाधिकरणाभावप्रतियोगित्वस्य सत्त्वात् तल्लक्षणमिष्टमेव इति सिद्धसाधनं स्यात्। न वा तस्य मिथ्यात्वम्।

अवच्छेदकविशेषमादृत्य प्रतियोगिनः तदभावस्य च सत्त्वं वर्तते अवच्छेदकश्च धर्मसम्बन्धौ। शाखावच्छेदेन संयोगः मूलावच्छेदेनच संयोगभावोऽस्ति। अतः शाखावच्छेदेनैव तदभावः ग्राह्यः।

**तृतीयमिथ्यात्वलक्षणम् विवरणाचार्यप्रकाशात्मयतेः ज्ञाननिवत्त्वर्यत्वं मिथ्यात्वम्**उत्तरज्ञानेन निवर्त्त्ये पूर्वज्ञाने सिद्धसाधनम्। मुद्गरपातादिनिवर्त्त्ये घटे ज्ञाननिवर्त्यत्वं नास्ति तत्रतु मुद्वारपातनिवर्त्त्यत्वं वर्तते अतः घटेऽव्याप्तिः[8] (घटस्यापिमिथ्यात्वेन लक्ष्यत्वात्)। ज्ञानत्वेन ज्ञाननिवर्त्यत्वकथने न पूर्वज्ञाने सिद्धसाधनम्। पूर्वज्ञाने कदाचित् उत्तरज्ञाननिवर्त्यत्वमस्ति कदाचिदुत्तरेच्छानिवर्त्यत्वमस्ति तथा च पूर्वज्ञाने स्वोत्तरववर्त्तिविशेषगुणत्वेन नाश्यत्वमस्ति न तु ज्ञानत्वेन ज्ञाननाश्यत्वमस्ति इति न दोषः। परन्तु ज्ञानत्वेन ज्ञाननिवर्त्यत्वकथने अधिष्ठानसाक्षात्कारत्वेन (प्रत्यक्षत्वेन) निवर्त्ये शुक्तिरजतादौ च ज्ञानत्वेन ज्ञाननिर्त्यत्वरूपस्य साध्यस्याभावात् दृष्टान्ते शुक्तिरूप्ये साध्यवैकल्यम् (व्यभिचारः) अथवा कुत्राप्यारोपिते लक्षणागमनात् असंभवः। यदि तद्वारणाय ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वमुच्यते तदा अधिष्ठानसाक्षात्कारत्वस्यापि ज्ञानत्त्वव्याप्यधर्मत्वात् शुक्तिरजतादौ न साध्यवैकल्यम् इति तदा ज्ञानत्वव्याप्यस्मृतित्वेन

निवर्त्ये संस्कारे सिद्धसाधनम् इति।ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं हि ज्ञाननिवर्त्यत्वम्। ज्ञानप्रयुक्तो योऽवस्थितिसामान्याभाव: तत्प्रतियोगित्वमिति।

अवस्थितिश्चद्वेधा स्वरूपेण, कारणात्मना च[9] (उपादानात्मना अविद्यात्मनावा) मुद्गरपातेन घटस्य स्वरूपेण (स्थूलाकारेण) अवस्थितिविरहेऽपि कारणात्मना (मृदात्मना) अवस्थितिविरहोन जात:। कारणात्मना अवस्थितिविरहश्च ब्रह्मज्ञानेनैव भविष्यति इति ज्ञानप्रयुक्तावस्थितिसामान्यविरहपदेन घटाभावस्याग्रहणान्न घटेऽव्याप्ति:। एवमतीतघटे ज्ञाननिवर्त्यत्वाभावादव्याप्तिरिति न शङ्कनीया अतीतघटोऽपिकारणात्मना अस्त्येव। कारणात्मना अवस्थिते: विरहस्तु अधिष्ठानतत्त्वसाक्षात्कारादेव भवति तथा च घटादेरवस्थितिसामान्यविरहस्तु घटाधिष्ठानब्रह्मतत्त्वसाक्षात्कारादेव भवति। उत्तरज्ञाननिवर्त्येपूर्वज्ञाने न सिद्धसाधनम् उत्तरज्ञानेन लीनस्य पूर्वज्ञानस्य स्वकारणात्मना अवस्थानात् अवस्थितिसामान्यविरहत्वं न जातम्।

शशविषाणादावस्थितिसामान्यविरहेऽपि तस्यज्ञानप्रयुक्ताभावान्नातिव्याप्ति तत्र तु साधकमानाभावप्रयुक्तत्वमस्ति अतोनातिव्याप्ति इति ज्ञानपदस्य सार्थक्यं प्रदर्शितम् शुक्तिरजतेतु प्रातिभासिकरजतस्यावस्थितिसामान्यविरह:।

अधिष्ठानतत्त्वज्ञानप्रयुक्त: भवति अत: न दृष्टान्ते साध्यविकलता। ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वमित्यपि साधु। उत्तरज्ञानस्य पूर्वज्ञाननिवर्तकत्वञ्च न ज्ञानत्वव्याप्यधर्मेण किन्तु इच्छादिसाधारणेनोदीच्यात्मविशेषगुणत्वेनास्ति तेन न सिद्धसाधनम्। ज्ञानत्वव्याप्यस्मृतित्वेन ज्ञाननिवर्त्ये संस्कारे सिद्धसाधनन नव क्तव्यम् स्मृते: संस्कारनाशकत्वे मानाभावात्। स्मृतौ हि जातायां संस्कारो दृढो भवति। वस्तुतस्तु साक्षात्कारत्वेन ज्ञाननिवर्त्यत्वं विवक्षितम्।

**चतुर्थमिथ्यात्वलक्षणम् चित्सुखाचार्यस्य-** स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम् मिथ्यात्वम्[10] स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वं मूलस्थस्यार्थ: अन्यथा यथाश्रुतार्थस्वीकारे द्वितीयलक्षणेन सह पौनरूक्त्यं स्यात् संयोगेन घटाधिकरणे संयोगेन घटस्याभाव: कथं भविष्यति न वा समवायेन घटाधिकरणे कपाले समवायेन घटस्याभाव: भविष्यति प्रतियोग्यभावयो: एकत्र विरोधात् इति शङ्का प्रतियोग्यभावयो: द्वयोरपिकाले सहसम्भववत् देशेऽपि सहसंभवे न दोष:। समवायेन घटाधिकरणकपाले समवायेन घटाभावसत्त्वेकपालस्योपादानत्वमेव न स्यात् इति न शङ्कनीयम् यत्र घटप्रागभाव: सएव घटोपादानम् तथा च उपादानं प्रागभावदेश: एव यत्र प्रागभाव: सएवोपादानम्। परन्तु घटात्यन्ताभावाधिकरणेकपाले कथं घटप्रागभाव: स्थास्यतितत्प्रागभावाधिकरणे तदत्यन्ताभावविरोधात् इति शङ्का घटोत्पत्तिपूर्वकाले घटप्रागभाव: घटान्यन्ताभावश्च यथा काले वर्तते तथैवात्रापि न विरोध:। न च काले उभयो: सत्त्वे इदानीं घटप्रागभाव: इदानीं घटात्यन्ताभाव: इति प्रतीतिरेवमानम्। देशेतु प्रतियोगिसमानाधिकरणाभाव सत्त्वे नेह किञ्चित्प्रमाणमिति? नेह नानास्ति किञ्चन इति श्रुतेरेव प्रमाणत्वात्।

स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वमितिलक्षणे असत: शशविषाणादे: शशविषाणमित्यादिशब्देन स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वादतिव्याप्ति:शशविषाणाद्यौ इति? स्वात्यन्ताभावाधिकरणे एव सत्त्वेन प्रतीयमानत्वं विवक्षणे न दोष:।

असदेव इदमग्र आसीत् इति श्रुत्या असतः अपिसत्त्वं स्वीकर्तव्यमिति न वक्तव्यम् तत्र असत् आसीत् इत्यस्य सत् न आसीत् इत्येवार्थः। असत्पदे न नञ्समासः अपितु अपदं नञ्समानार्थकमव्ययम् ''अमानोना निषेधवचनाः'' इत्यनुशासनात्।

**पञ्चममिथ्यात्वलक्षणम् आनन्दब्बोधभट्टारकस्य-** सद्विविक्ततत्वं मिथ्यात्वम् वियदादिप्रपञ्चे सद्रूपब्रह्मभेदस्य सिद्धत्वेन तादृग्भेदसाधने सिद्धसाधनमेन। अतः सत्त्वञ्चात्र प्रमाणसिद्धत्वम् ग्राह्यम् भेदप्रतियोगितावच्छेदकं सत्त्वं प्रमाणसिद्धत्वम् तच्च प्रमाणजन्यज्ञानविषयत्वम्। प्रमाणसिद्धत्वावच्छिन्नप्रतियोगिताकभेदो वियदादिप्रपञ्चे न सम्भवति[11] वियदादीनां यथायथं प्रत्यक्षादिप्रमाणसिद्धत्वात् तथा चाव्याप्तिः। अतः प्रमाणत्वञ्च दोषासहकृतज्ञानकरणत्वम् ग्राह्यम् दोषाजन्यं यज्ज्ञानं प्रमारूपं तत्करणं प्रमाणमिति तादृशप्रमाणजन्यज्ञानविषयो यः सः प्रमाणसिद्धः स एव सत्पदेव विवक्षितः तद्भिन्नत्वं सद्विवक्ततत्वम् इति।

दोषाजन्यज्ञानकरणजन्यज्ञानविषयभिन्नत्वस्य मिथ्यात्वलक्षणस्य ज्ञानाविषये शशविषाणादौगतत्वात् अतिव्याप्तिः। एवं शुद्धंब्रह्म न वृत्तिविषयः इति मते तादृशज्ञानविषयभेदस्य शुद्धे ब्रह्मणि अपिसम्भवात् ब्रह्मण्यतिव्याप्तिः तदर्थं सत्त्वेन प्रतीयमानत्वं विशेषणमपि देयम् तथा च लक्षणं सत्त्वेन प्रतीयमानत्वे सति दोषाजन्यज्ञानकरणजन्यज्ञानविषयभिन्नत्वं मिथ्यात्वम् एवञ्च असद्ब्रह्मणोः सत्त्वप्रकारक– प्रतीतिविषयत्वाभावात् न तत्रातिव्याप्तिः।

**मिथ्यात्वसामान्योपपत्तिः-** उक्तमिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वापातः। एकस्मिन् धर्मिणि प्रसक्तयोर्विरूद्धधर्मयोरकमिथ्यात्वेऽपरसत्यत्वनियमात् मिथ्यात्वसत्यत्वे चतद्वदेव प्रपञ्चसत्यत्वापत्तिः उभयथापि अद्वैतहानिः। तत्र हि विरूद्धयोधर्ममेयोरेकमिथ्यात्वेऽपरसत्यत्वम् यत्र मिथ्यात्वावच्छेदकं (दृश्यत्वादिः उभयवृत्तिर्नभवेत्। यथा रजतत्वस्यनिषेधे रजतत्वाभावस्य सत्त्वं, रजतत्वामावस्य निषेधे रजतत्वस्य सत्त्वं तत्र निषेध्यतावच्छेदकं भिन्नंभिन्नं रजतत्वत्वं रजतत्वाभावत्वञ्च। यथा वा रजतभेदस्यनिषेधे रजतत्वस्य सत्त्वं रजतत्वस्यनिषेधेच रजतभेदस्य सत्त्वं अत्रापि निषेध्यतावच्छेदकं भिन्नभिन्नं रजतभेदत्वं रजतत्वत्वञ्च। प्रकृतेतुनिषेध्यताच्छेदकं एकमेव दृश्यत्वं तच्च सत्यत्वमिथ्यात्वयोः समानमेव। सत्यत्वमिथ्यात्वयोः परस्परविरहरूपत्वं नस्वीक्रियते तुच्छे शशविषाणादौ सत्यत्वस्य मिथ्यात्वस्य चाभावात्। अत्र एकबाधकबाध्वत्वमस्ति अस्ति च प्रपञ्चतन्मिथ्यात्वयोः एकब्रह्मज्ञानबाध्यत्वम्।[12]

**सन्दर्भग्रन्थाः-**

1.गौडब्रह्मानन्दीसहिता अद्वैतसिद्धि– पृ. 20

2.बालबोधिनी, पृ. 17

3.सिद्धिव्याख्या, पृ. 23

4.गौडब्रह्मनन्दीयुता अद्वैतसिद्धिः, पृ. 49

5.अद्वैतसिद्धिः, पृ. 94

6.बालबोधिनीटीका, पृ. 54

7.सिद्धिव्याख्या, पृ. 101

8.अद्वैतसिद्धिमूले, पृ. 124

9.अद्वैतसिद्धिमूले, पृ. 125

10.सिद्धिव्याख्या, पृ. 189

11.बालबोधिनीटीका, पृ. 151

12.अद्वैतसिद्धिमूले, पृ. 165